श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीसारनाथस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसारनाथस्तोत्रम् ॥

सारक्षेत्रपतिं सरोजजपतिं सारातिदूरं सदा
सारं सारविमानगं सुरवरं सारेश्वरीनायकम्।
नित्यं सारसरोवरे विरचितस्नानद्विजाराधितं
संसाराब्धितरिं सरोजनयनं तं सारनाथं भजे॥ १॥

सर्वतत्त्वालय श्रीमन् व्याकृताघशिरो हरे।
परमात्मन् सारनाथ रक्ष माम् शरणागतम्॥ २॥

समस्तजगदाधार शङ्खचक्रगदाधर।
सारनाथ ममानुज्ञां देहि त्वत्तीर्थसेवने॥ ३॥

सारक्षेत्रे सारनाथः सारपुष्करिणीतटे।
रमया सारनायक्या विमाने सारसंज्ञके॥ ४॥

अव्याजकृपया नित्यं तत्र सन्निहितो हरिः।
श्रिताभीष्टं ददन्नित्यं मोदते सूरिभिः सह॥ ५॥

पञ्चसारमिदं नित्यं यः स्मरेत् प्रयतः पुमान्।
स सर्वानर्थितानर्थान् ध्रुवमाप्नोति पूरुषः॥ ६॥

नाच्यारुचारुवदनाम्बुजराजहंसं
सत्सारवच्चरितपूर्णमुदारहासम्।
संसारसागरतरिं हृदयाब्जवासं
तं श्रीनिवासमभजं स्वरमावतंसम्॥ ७॥

नमस्ते सारनाथाय कावेरीवरदायिने।
सर्वपापविनाशाय सर्वाभीष्टप्रदायिने॥ ८॥

सारक्षेत्रनिवासाय सारपुष्करिणीतटे।
यस्य प्रसादात् कावेरी गङ्गाधिक्यं पुरा गता॥ ९ ॥

भक्ताभीष्टफलप्रदाङ्घ्रियुगलं कौशेयराजत्कटिं
लक्ष्मीमङ्गलमन्दिरोरसि लसन्मुक्तावलीकौस्तुभम्।
हस्तैः शङ्खरथाङ्गपङ्कजगदा बिभ्राणमभ्राकृतिं
राकाचन्द्रमुखं सुजातमकुटं श्रीसारनाथं भजे॥ १० ॥

सारक्षेत्रे पवित्रे सुजनसुखकरे सारकासारतीरे
साराख्यव्योमयाने विरचितनिलयः सारनेत्र्या समेतः।
साराम्भोधानकञ्जायितनयनयुगः फालसौन्दर्यसारः
संसाराब्धेरसारात् स हरिरवतु मां सारनाथो रमेशः॥ ११ ॥

आलोड्य चिन्तितपदा श्रुतिराह यस्मा-
दास्तम्बमाम्बुजभवेन्दुशिरोमणिभ्याम्।
उत्पत्तिजीवनलयानुदितान्ययोग-
हानं श्रियःपतिममुं हृदि चिन्तयामः॥ १२ ॥

यस्मादथर्वशिखया द्रुहिणस्वमूर्ति-
रुद्रेन्द्रमूलजगतोऽभिहिता प्रसूतिः।
पैङ्ग्यश्रुतिस्फुटगतिप्रतिपन्नरूपा
पद्मासनं तमनिशं प्रणमामि देवम्॥ १३ ॥

यत्पत्नीदृष्टिलेशाद् द्रुहिणहरमुखा लब्धसत्ताः सुरेन्द्रा
यद्भक्तानां नियम्याः सकलसुरगणा ब्रह्मरुद्रेन्द्रमुख्याः।
यत्पादक्षालनाम्बु प्रथयति शुचितां चन्द्रमौलेश्च लोके
तस्मै नारायणाय प्रवितनुत नुतिं सर्वभूतान्तराय॥ १४ ॥

ब्रह्मेशादेर्नियन्ता परमपुरुष इत्याह नित्या हि वाणी
पुंवाक्यैस्तस्य बाधः कथमिव भविता प्राप्तदोषप्रभेदैः।
दूरापास्तं च गौरीमधुमथनभिदाबाधकं वाक्यजालं
लक्ष्मीशं तं प्रपद्ये प्रतिभटरहितप्राभवोद्भूतिभव्यम्॥ १५ ॥

वेदान्तेषु प्रतीतात् तदितरभजनाद् यस्य भक्तिः प्रकृष्टा
तत्रैव स्थानमग्र्यं स्फुरति विधिशिवस्थानतोऽप्यूर्ध्वदेशे।
लक्ष्म्या सार्धं तमेकं हृदयसरसिजे ब्रह्मविद्याप्रदात्र्या
देवं नारायणाख्यं भजलधिसमुत्तारणं संश्रयामः॥ १६ ॥

॥ इति श्रीसारनाथस्तोत्रम् समाप्तम् ॥